# सुघटिता भाषा

संस्कृतभाषायाः महत्वम्

* वेदाः
* पुराणाः
* दर्शनानि
*साहित्यग्रन्थाः

* महाकाव्यानि
* व्याकरणम्
* शास्त्रकाव्यानि
* आयुर्वेदम्

* संस्कृतभाषा विश्वभाषासमुदाये प्रमुखं स्थानमलङ्करोति ।

* संस्कृतं नाम दैवीवाक् अन्वाख्याता महर्षिभिः दण्डि

* अस्याः प्राचीनतमस्वरूपं ऋग्वेदे एव दृश्यते ।

* इयं भाषा देववाणी सुरभारती ,अमरवाणी ,सुरभाषा ,गीर्वाणवाणी भारसती इत्यादिभि बहुभिः नाम्नैः व्यवह्रियन्ते ।

* सम् उपसर्गपूर्वक — कृ -धातुतः क्तप्रत्ययान्त रूपं भवति संस्कृतम् ।

* वस्तुतः विद्यमानासु सर्वासु प्राचीना भाषा ।

* सर्वाः अपि भारतीयभाषाः अस्याः जाताः अनया एव पोषितश्च वर्तन्ते ।

* संस्कृतस्य वैदिक लौकिक रूपद्वयं दृश्यते ।

* वैदिकं तु वेदानां वा वेदसम्बन्धी ग्रन्थानां रचनायाम् उपयुक्ताः भाषा।

* लौकिकं तु पाणिनिना व्याकरणद्वारा नियमनिबद्धा भाषा।

* लौकिके अपि प्रदेशानुसारिः आचार्यानुसारिः च भेदा अस्ति।
  उदा-दक्षिणात्या मधुरप्रिया गौडश्चौजप्रकृतिका पाञ्चालस्तूभयप्रकृतिका।

# वेदाः

→ आम्नायः ,आगमः, श्रुतिः

## ऋग्वेदः

→ ऋच्यते स्तूयते यया साऋक् ।तादृशीनां ऋचां समूह एव ऋग्वेदः । सूक्तं मण्डलं भेदेन द्विधा विभक्तः ।शाकल मते १०४६७ मन्त्राः । शौनकानुक्रमणे तु १०५८० मन्त्रान् आह ।

## सामवेदः

→ सामवेदस्य गानप्रचुरता प्रथिता , ऋच एव गीयन्ते । सामवेदे १५४९ मन्त्राः सन्ति । सप्त स्वराः , छन्दः च सामवेदे अस्ति ।

## यजुर्वेदः

→ यजूंषि गद्यानि ।अध्वर्युणा यज्ञे उपयुज्यमाना मन्त्रा एवत्र यजुर्वेदे सङ्कलिताः ।यजुर्वेदो द्विप्रकारकः कृष्णयजुः , शुक्लयजुश्च ।४० अध्यायान् ,३०३ अनुवाकान् ।

## अथर्ववेदः

→ अभिचारक्रियायाः प्राधान्येन प्रतिपादकः अयं वेदः अथर्व नामक ऋषिणा दृष्टत्वात् अथर्ववेद इत्युच्यते ।अत्र वेदे २० काण्डानि ,७३१सूक्तानि २९८७ मन्त्राःविद्यन्ते।

# वेदाङ्कानि

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।

वेदानां समग्रावबोधनाय वेदाङ्गानि कल्प्यते।

- शिक्षा → वेदमन्त्राणामुच्चारणाय।
- कल्पम् → श्रौत- गृह्य – शुल्बसूत्राणि।
- व्याकरणम् → साधु-असाधुत्व विवेचनाय।
- निरुक्तम् → शब्दनिर्वचनज्ञानाय।
- ज्योतिषम् → वेदोक्तकर्मनिमित्तकालज्ञानाय।
- छन्दः → वेदमन्त्राणां वृत्तज्ञानाय।

## उपवेदाः

आयुर्वेदः - ऋग्वेदः।
धनुर्वेदः - यजुर्वेदः।
गान्धर्वेदः - सामवेदः।
अर्थवेदः - अथर्वेदः।

# उपनिषदः

वेदान्ता उपनिषदः इत्युच्यते । उपनिषच्छब्दस्य रहस्यमर्थः , अध्यात्मविद्यारहस्य प्रतिपादका वेदभागा उपनिषदः कथ्यते। मुक्तिकोपनिषदि उपनिषदां संख्या १०८ कथिता। तत्र१० उपनिषदः ऋग्वेदसम्बद्धाः ,१९ उपनिषदः शुक्लयजुर्वेदसम्बद्धाः , ३२कृष्णयजुर्वेदसम्बद्धाः,१६ सामवेदसम्बद्धाः,३१अथर्ववेदसम्बद्धाः। तासु दशोपनिषदः प्रसिद्धाः ईश-केन-कठ-प्रश्न-मुण्ड -माण्डूक्य -तैत्तिरीय -ऐतरेय -छान्दोक्य बृहदारण्यकोपनिषदः। कतिचन -उपनिषदो गद्यात्मिकाः ,कतिचन पद्यात्मिकाः कतिचन गद्यपद्योभयात्मिकाश्च।

# दर्शनानि

## वैदिकदर्शनानि

१. न्यायदर्शनम्  - गौतमः    ( प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां यथार्थ ज्ञानन्निःश्रेयसाधिगम इति तत्सिद्धान्तः )

२.वैशेषिकदर्शनम् - कणादः   (धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्याभ्यां तत्वज्ञानन्निःश्रेयसाधिगमः )

३.सांख्यदर्शनम् - कपिलः (पञ्चविंशतिः तत्वानि मूलप्रकृतिः, महान् ,अहङ्कारः,शब्दस्पर्शरूपरसगन्ध-तन्मात्राणि ,एकादशेन्द्रियाणि,पञ्चमहाभूतानि,पुरुषश्च )

४.योगदर्शनम् - पतञ्चलिः (योगश्चित्तवृत्तिर्निरोधः। योगदर्शने पादचतुष्टयात्मके योगस्वरूपम् ,क्रियायोगः तत्साधनानि यमादीनि,ध्यानधारणासमाधिरूपम् जन्मौषधिमन्त्रतपःसमाधिजसिद्धिपञ्चकं कैवल्यरूपं चनिरूपितम्।

५.मीमांसादर्शनम्- जैमिनि

६.वेदान्तदर्शनम् -

## अवैदिकदर्शनानि

१.चार्वाकदर्शनम्    २.बौद्धदर्शनम्    ३.जैनदर्शनम्

# व्याकरणम्

व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम् । इति व्युत्पत्यनुसारेण संस्कृतवाङमये प्रयुक्तानां शब्दानां शुद्ध्यशुद्धोः विचारः व्याकरणेनैव क्रियते ।व्याकरणस्य लब्धप्रतिष्ठाचार्यः पाणिनिः स्वकीये अष्टाध्य़ायी नामके ग्रन्थे स्वपूर्ववर्तीनां अनेकेषां वैयाकरणानां नामनिर्देशं चकार। अष्टाध्य़ाय्यां आचार्यः पाणिनि अक्षरात् आरभ्य पदम् ,वाक्यम् ,कर्ता ,कर्मं ,क्रिया ,कारकं,लकाराः प्रत्ययाः ,शब्दरूपाणि च सुव्यक्ततया सूत्ररूपेण प्रतिपादयति । भाषायाः व्याकरणस्य संपुष्टिः एव आधुनिकयुगे संङ्गणकयन्त्रे प्रयोक्तुम् संस्कृतभाषा उत्तमं इति शास्त्रज्ञाः कथयन्ति।

# साहित्यग्रन्थाः

- संस्कृत भाषायाः पोषणे साहित्य ग्रन्थाः महत्वपूर्णं स्थानं वहति। लौकिकसाहित्यं सामान्यतया दृश्य-श्रव्य भेदेन विभक्तुम् शक्यते। दृश्यकाव्यस्याधारभूतग्रन्थं भवति भरतस्य नाट्यशास्त्रम् । दृश्यकाव्ये दशरूपकाणि। श्रव्यकाव्ये रामायणम् ,महाभारतम् ,पञ्चमहाकाव्यानि ,गद्यकाव्यनि ,पद्यकाव्यानि ,चम्पुकाव्यानि ,सन्देशकाव्यानि , गीतिकाव्यानि च।
- इतिहासः - रामायणम् (आदिकविः वाल्मीकिः) , महाभारतम् - (व्यासः)
- **पञ्चमहाकाव्यानि** -१.कुमारसंभवम् २.रघुवंशम् - कालिदासः ३. शिशुपालवधम् - माघः ४. किरातार्जुनीयम् - भारविः ५. नैषधीयचरितम् - श्रीहर्षः
- गद्यकाव्यम् - बाणभट्टस्य कादम्बरी , विष्णुशर्मायाः पञ्चतन्त्रम् आदि...
- आख्यायिका -बाणभट्टस्य हर्षचरितम्
- मिश्रकाव्यम् - चम्पूकाव्यानि ।भोजराजस्य चम्पूरामायणम् ।